# MAYAMATA

Publicación original: Bruno Dagens (ed.) (2007) "Renovation work" (versión original en sánscrito), *Mayamatam*, 2 volumes, Indira Gandhi National Centre for the Arts, pp. 802-818.

## अथ पञ्चत्रिंशोऽध्यायः[1]

## अनुकर्मविधानम्[2]

अथ वक्ष्ये [3]हर्म्याणां लिङ्गानां पीठकानां च ।
प्रतिमानामन्येषां [4]वास्तूनां लक्षणान्तरतः ॥ १ ॥
अनुकर्मविधिं सम्यक् संक्षेपात् तत्क्रमेणैव[5] ।

### [ भवनजीर्णोद्धारः ]

भवनं भिन्नं पतितं वक्रं [6]प्राचीनतत्त्वं च जीर्णं च ॥ २ ॥
जातिश्छन्दविकल्पा[7]भाससंस्थानकेभ्य इतरं च ।
यान्यप्यलक्षणानि हि तानि [8]च तत्तल्लिङ्गभेदवशात् ॥ ३ ॥
तत्र द्रव्यैरन्यैरुत्कृष्टैर्वा नवैस्तु घटैः ।
[9]आयाद्यथोचितं तद्विस्तारोच्चादिभिस्त्वलङ्कार्यैः ॥ ४ ॥
यानि सलक्षणकानि प्रत्यङ्गोपाङ्गदेशेषु ।
तानि च [10][तत् ] तद्द्रव्यैर्हीनादीन्येव येन केन[चित् ][11] ॥ ५ ॥
यावद्घनतां यान्ति यावत्सौम्यप्रयोज्यानि[12] ।
यावत्तदेव [13]धीमान्नवतां प्रकर्तुमिच्छति चेत् ॥ ६ ॥

1. Manuscripts E, H
2. H : विधिः
3. H : लिङ्गानां हर्म्याणां
4. H : वा वास्तूनां
5. H : क्रमेण वै
6. E, H : प्राचिदत्वं च
7. E : ०भ्यासंस्थानकेऽभ्यतरं च; H : ०भासंस्नाकेऽभ्यतरं च
8. E, H : चन्तलिङ्गहेदवशात्
9. H : आयाद्यधो च तं
10-11. [तत् ] and [चित् ] are added *metri causa*.
12. H : répète सौम्यप्रयोज्यानि
13. E, H : धीमान्नवधा

तत्तद्विपुलोत्सेधे सौष्ठिककोष्ठाद्यलङ्कारैः ।
[14]नात्येकमुदितं तत्स्वाकृत्या [15]सर्वथा तज्ज्ञैः ॥ ७ ॥
नागरभवने नागरमुदितं स्याद्
द्राविडभवने द्राविडमुदितम् ।
वेसरभवने स्याद् वेसरं शुभद-
[16]-मर्पितभवनेऽप्यर्पितभवनम् ॥ ८ ॥
[17]अर्पितादितरभवनेऽप्यर्पितादितर[भवनम्] ।
[18]योज्यं क्रमेण विदुषा [19]वस्तु सदा सर्वयत्नेन ॥ ९ ॥
सप्राकार[20][विमाने] सालाद्बहिर्वाबहिस्तूक्ताः[21] ।
[22]प्रासादे या गतयः कुरुते तद्विधिं सम्यग्गाढमथ वक्ष्ये ॥ १० ॥
मूलविमानसमं वा तदधिकमन्यतरं निरुतेष्टम्[23] ।
दिक्षु [24]समोन्नतत्त्वं विदिक्षु शेषेषु वा कुर्यात् ॥ ११ ॥
विमान[25]निष्क्रमं मूलाष्टमूलाब्धिहीनं तु युक्तिवशात् ।
उत्तरतो वा पुरतः परितः सालं तु वर्धयेद् विधिना ॥ १२ ॥
भवने जीर्णमथ तत्कर्तव्यं [26]चेत्तदन्यस्मिन् ।
दिक्षु [27]चतुर्ष्वपि नेष्टं तस्य [28]बाह्ये वस्तुविदा ॥ १३ ॥
विपरीते तु विपत्त्यै तस्माद्युक्तक्रमेण कर्तव्यम्[29] ।
[30]सन्त्यज्य नष्टवस्तुगर्भविधानात् पुनः स्थाप्यम्[31] ॥ १४ ॥

14. E : नात्यकमुदितस्
15. E, H : सर्वधा
16. E : मपितभवनेमपितभवने; H : मपितभवनेतपितभवने
17. E, H : मपितादितरभवनेमपितादितरम्
18. H : भोज्यं
19. H : वस्तुदा
20. E, H : समने
21. E, H : -स्तुक्तः
22. E, H : प्रासाद-
23. E, H : ०न्यकरीनिरुतेष्ट
24. E : समुन्नतत्त्वानि विदिक्षु ; H : समुन्नतत्त्वानि दिक्षु
25. E, H : निष्क्रम-
26. H : ते तद-
27. H : चतृष्वपि
28. E, H : बाह्य-
29. E, H : कर्तव्या
30. E, H : सन्त्यज्या
31. E, H : परस्थाप्य

## [ लिङ्गजीर्णोद्धारः ]

पतितं [32]स्फुटितं लिङ्गं [33]दुस्तरपारासुवृत्तं च ।
[34]वक्रमधोगतलिङ्गं लिङ्गादत्यूर्ध्वगतलिङ्गम् ॥ १५ ॥
[35]परितकैरुपकामं [36]तदज्ञेन स्थापितं लिङ्गम् ।
भिन्नं ज्वलनालीढं जीर्णं [37]सस्फोटनं तु भग्नं च ॥ १६ ॥
चोरादिभिरुद्धृतं किंदेशं स्थानं तु [38]दूषितैः स्पृष्टम् ।
विपरीतमयोगं यल्लिङ्गं संदृश्यते तु भुवि[39] ॥ १७ ॥
तेन सदाशिवमुदितं [40]तज्ज्ञैर्लोकेऽपि जन्तूनाम् ।
पतिते [41]चेत्स्थापिते लिङ्गे[42]ऽस्मिन्नज्ञेन केनापि ॥ १८ ॥
अन्यत्सूर्य[43]किरणान्निहतं लिङ्गं स्थापयेत् तत्र ।
[44]अन्त्येनान्तरितं वा श्वभ्रान्तं नैव संप्राप्तम् ॥ १९ ॥
अनभीष्टमार्गतास्यं तल्लिङ्गं [45]तुच्छमिति कथितम् ।
तत्रैव तु तल्लिङ्गं सम्यग्विद्वान् [46]यः समीकुर्यात् ॥ २० ॥
वक्रं च वक्रवृत्तं [47]तल्लिङ्गं यत्तदेव तत्समितम् ॥ २०१/२ ॥
तल्लिङ्गं तु निमग्नं [48]कालज्ञातं त-[थ-]ा वापि ।
तदधोगतमित्युक्तं तल्लिङ्गं चो-[द्धरेत् समितम्][49] ॥ २१ ॥
तल्लिङ्गं तु निमग्नं [50]कालाज्ञातमूर्ध्वगतम् ।
तत्र स्थाप्यं [51][पुनरपि] निर्दोषकं यदिदम् ॥ २२ ॥
[52][सरितः स्रोतः] पतितं नीत्वा [53]शततदण्डमन्यस्मिन् ।

32. E, H : स्फाटिके
33. E : दुःस्थीर-; H : दुःस्तीर
34. E, H : वको
35. E : परितक्तै०
36. E, H : तु यज्ञेन
37. E, H : सस्पोष्टनं तु भवनम्
38. E, H : भूषितैः
39. H : रव
40. H : तत्त्वै०
41. E, H : चेत्स्फाटिके
42. E : ऽस्मान्नार्गेन; H : ऽस्मिन्नर्गेन
43. E, H : तीव्रणान्निहतं
44. E, H : अन्त्योनान्तरतं
45. E, H : तुष्ठमिति
46. H : य; E : omits यः
47. E : च लिङ्गं यात्त तदेव सम्मतम्; H : च लिङ्गं यात्ततव सम्मतम्
48. E : कलाज्ञानन्त . . . । वापि; H : कालज्ञानं च वापि
49. E, H : चोर्ध्वरितु . . . सम्मतम्
50. E, H : कालाज्ञातत्यू०
51. Unmarked gap.
52. E, H : रितघ्रोतपतित-
53. E, H : शतदण्ड्यं



LIṄGA.
Templo Veerabhadra, Lepakshi, India.
*Imagen: Dominio público.*

स्थाप्यं [54]तद्दैविकविधिना शुद्धे देशे मुखं प्राग्वत् ॥ २३ ॥
[55]मन्त्रक्रियेतरलिङ्गं सर्वेषां लक्षणोपेतम् ।
[56]अज्ञस्थापितमेतत्तद्योजयेद् विधिना ॥ २४ ॥
[57]हीनं ज्वलनालीढं जीर्णं सस्फोटकं च भग्नं च ।
लिङ्गं [58]साघ्यं त्यक्त्वा [59]पुनस्तत्स्थापयेन्नवं लिङ्गम् ॥ २५ ॥
[60]अधरोत्तरमज्ञानां [61]मोहेन वाऽप्यन्यदाननयुक्तम् ।
[62]विपरीतं त्यजेत् सहसा उचितं [63]यन्नवमन्यत्तत्रैव स्थापयेद् विधिना ॥ २६ ॥
अत्रोचितलक्षणं तत् शून्य तलं तु वा चाक्षम् ।
[64][अ-]ग्राह्यं क्षेत्रगतं [65]यन्न तद्योग्यं सर्वथा त्याज्यम् ॥ २७ ॥
[66]तत्रैवान्यल्लिङ्गं नवमुचितं स्थापयेद् विधिना ।
चोरादुद्धृतकं [67]तदन्तःपतितं चेत्पञ्चसन्धानम्[68] ॥ २८ ॥
तत्र तदेव [69]स्थाप्यं निर्दोषं पूर्ववद् विधिना ॥ २८½ ॥
चण्डालशूद्रकाद्यैः स्पृष्टं च लिङ्गं [70]तर्ह्ययोग्यकं शस्तम् ।
नदीतीरं चेत् [स्पृष्टं][71] [72]मन्दिररहितं तु तल्लिङ्गम् ॥ २९ ॥
पूर्वस्यामुत्तरतो नीत्वान्यस्मिन् शुभे देशे ।
[73]सुस्थापितं [च] लिङ्गं पूर्ववदेवानाय्य विधिना-[ऽपि] ॥ ३० ॥
बेरं [74]वाप्येवं तत्तद्युक्त्यान्यस्मिन्नवे देशे[75] ।
स्थाप्यं [76]यदि निर्दोषं सर्वमनुक्तं तु [77]तल्लिङ्गे ॥ ३१ ॥
द्वादशवर्षादूर्ध्वं शून्यत्वं याति यल्लिङ्गम् ।

54. H : तद्देविक-
55. E : मन्त्रकियो-
56. E : अज्ञास्यापितमेतत्तन्त्तेद्योज०; H : अज्ञास्थापितन्मेतन्त्तेद्योजः
57. E : ? ज्जीहीनज्वालानांधजीर्णसंस्फोटकं; H : जीहीन-ज्वालानां धर्मिणां सस्फोकं
58. E, H : सचार्घ्यकंस्त्यक्त्वा
59. H : पुर०
60. E : त्वत्तधरोत्तारम्मज्ञा०; H : अधरोत्तार०
61. H : मोहानां
62. E, H : विपरीत्यं त्यजत्सहश्रा
63. H : यन्तवम०
64. E, H : ग्राह्यं
65. E, H : यत्तद्योग्यं
66. E, H : तत्रैवान्यापिलिङ्गं
67. E, H : तत् मन्तपतितं
68. H : सर्न्धानाम्
69. E, H : स्थाप्य
70. H : तस्य
71. E, H : स्फाकं
72. E, H : मदिर-
73. E, H : षुस्थापितं लिङ्गं पूर्ववदेवानानाविधिना
74. E, H : वाप्यवनन्तद्युक्ता०
75. E, H : नदेवेशे
76. E, H : वदि
77. E, H : यल्लिङ्गे

तत्तन्निर्दोषं यदि नाग्राह्यमिदं वदन्ति केचिज्ज्ञाः[78] ॥ ३२ ॥
शिलामयं [79]तर्ह्युदके निक्षिपेत् त्वरितं बुधः ।

### [ पीठजीर्णोद्धारः ]

[80]शिलादिपीठं निर्दोषं [81] [प्रयोज्यं] चेत्तदेवहि ॥ ३३ ॥
ग्राह्यं ब्रह्मशिलादि [[82]स्यात् ] द्रव्यं पिण्डं च पूर्ववत् ।
अलक्षणं [83]च [हीनं च] स्फुटितादि- [भि] - रन्वितम् ॥ ३४ ॥
[84]सन्त्यज्य विधिना पीठं कुर्यादाकृति पूर्ववत् ।
पाषाणेनैव पाषाणे [85]चेष्टका चेष्टकामये ॥ ३५ ॥
पूर्ववत् पतितं पूर्वं पीठं [86]कुर्याद् यथोचितम् ।
[87]अलाभे ह्युपले चैव वेष्टके चेष्टका भवेत् ॥ ३६ ॥

### [ बेरजीर्णोद्धारः ]

बेरे शिलामये चैव वृक्षजे विकलाङ्गके ।
सन्त्यज्य सहसा बेरं स्थापयेत् पूर्ववन्नवम् ॥ ३७ ॥
मानोन्मानादुपेतं च जीर्णवत्स्फोटनादिकम् ।
बेरं त्यक्त्वान्यमत्रैव[88] स्थापयेद् विधिना पुनः ॥ ३८ ॥
[89]लोहजे मृण्मये बेरे [90]हस्तनासाङ्घ्रिभूषणे ।
[91]कर्णदन्तादिहीनं तु [92]तत्तद्द्रव्यैर्दृढीकृतम् ॥ ३९ ॥
उत्तमाङ्गविहीने तु त्यक्त्वान्यं योजयेन्नवम् ।

### [ सामान्यविधिः ]

प्रासादे वाऽथ लिङ्गे वा पीठे [93]वार्चासु सर्वदा ॥ ४० ॥
तत्तद्द्रव्यैर्वैरैर्वाऽपि कुर्याद्धीनैर्न योजयेत् ।

78. E, H : केजन्य
79. E, H : तद्युदिषु निक्षिपेत्तरितं
80. E : शिलाम-; H : शिवाम-
81. Unmarked gap.
82. E, H : द्रव्या (?) हण्डं
83. E, H : च स्फटिकादिरन्वितम्
84. H : सत्यञ्च विधाना
85. E, H : वृषतो
86. E, H : कुयात्तत्रयथो-
87. H : अलाभेद्विपुले
88. H : मन्त्रैव
89. E, H : लोहके
90. E, H : स्थाननस्यङ्घ्रिविभूषणे
91. E, H : कण्ठे दन्तं च
92. E : तदूर्ध्वेन; H : तदूद्धेन
93. E : वाचात्तु ; H : वार्च्चा तु

जीर्णे च तेन यः कर्तुमिच्छेद् द्रव्येन पण्डितः ॥ ४१ ॥
[94]पूर्वमार्गेण निष्पाद्य समं कुर्याद् यथाविधि ।
[95]तुल्यं हीनेऽधिकं चेष्टं सर्वदा शुभमिच्छताम् ॥ ४२ ॥
हीनं [96]कुर्याद् वरद्रव्यैः समं वा तत्र पूर्ववत् ।
[97]धामगृहगृहस्तम्भद्वारमानादिमानतः[98] ॥ ४३ ॥
[99]मृण्मयं निक्षिपेदप्सु[100] दारुजं चाग्निना दहेत् ।
[101]लोहजं वह्निना तत्र द्रुतं शुद्धं विगृह्यताम् ॥ ४४ ॥


### [ ग्रामादिजीर्णोद्धारः ]

ग्रामादीनां गृहादीनां शालानां च विशेषतः ।
आरम्भव्यासदीर्घाभ्यां [102]हीनं नेष्टं मुनीश्वरैः ॥ ४५ ॥
समं वा योजयेत् त [103]स्मादधिकं वाऽपि योजयेत् ।
[104]युक्तितः परितो वाऽपि प्राग्वद्दिशि विवर्धयेत् ॥ ४६ ॥
दक्षिणापरभागे तु वृद्धिदं वस्तुनाशनम् ।
[105]गृहमालि[106]कयोर्भूमिसंख्यामुपरि कल्पयेत् ॥ ४७ ॥
[107]सर्वथा नोचितं हीनं [108]कुर्यादुक्तक्रमेण तु ॥ ४७$\frac{१}{२}$ ॥

### [ बालस्थापनम् ]

[109]आद्यारम्भे [चा-] थवा जीर्ण- [-भिन्ने] [110]
हीनाङ्गानां कल्पने पातने च ।
लिङ्गे बेरे स्फोटनाद्यङ्गहीने
कुर्याद् बालस्थापनं पीठबन्धे ॥ ४८ ॥

94. E, H : पूर्वमाकेतिष्यां तु
95. E : ताभ्यां हीना०; H : ताभ्यां हीनादिकं
96. H : कुर्याद्विर-
97. H : यासग्रहग्रह
98. E, H : -ता
99. E, H : मृजये
100. H : ०दस्तु
101. H : लहजं
102. E, H : हीन
103. E : ०त्राधिकं
104. E : omits 46b.
105. H : ग्रह
106. E, H : ०काय
107. E, H : सर्वधा
108. E : कुर्याद्युक्त-
109. E, H : अद्यारम्भेऽथवा जीर्णे हीनाङ्गानां च
110. Unmarked gap.



BUDA.
Polonnaruwa, Sri Lanka.
*Imagen: Valerie Magar.*

लयशशीलयपीठ [करं चतुः] [111]
त्रिचतुरंश[112]कलाक्षकरं तु वा ।
[113]गुणयुगेन्द्रियषण्मुनिहस्तकैः
[114]प्रवरमध्यमके तरुणालयम् ॥ ४९ ॥
भवनमूल[115]तलाङ्घ्रिविशालतो
[116]द्विगुणकात्त्रिगुणमेति हि भित्तिः ।
[117] [भवन] शेषमधोगृहमानकं
तदपि मण्डपकं तु सभाऽपि वा[118] ॥ ५० ।
तद्गर्भार्धं [119]श्रेष्ठमर्धार्धकं त- ।
द्धीनं [120]मध्येऽष्टांशके नन्दमानम् ।
[121]लिङ्गायामं तुल्यनाहं सुवृत्तं
कुर्याच्छत्राभं शिरःसूत्रहीनम् ॥ ५१ ॥
तिथिकराग्र[122]जमादितयाङ्गुला-
ङ्गुलिविवर्धनया नवमानकम् ।
तरुणलिङ्गसमुन्नतकर्तृवद्[123]
गुणयुगांशकमासनवेशनम् ॥ ५२ ॥
भवति मूल[124]तलेतरतुङ्गकं
[125]सममुतार्धकमुत्तममाधमम्[126] ।
नवविधं वसुभागयुतेऽन्तरे[127]
तरुणलिङ्गसमुन्नतमीरितम् ॥ ५३ ॥

111. idem.
112. E; H : कर्मैलाक्ष
113. E, H : गुणधरयुगलेत्रियं षण्मुनिहस्तले
114. E, H : ध्यवरमध्यमे वरुणालम्
115. E, H : तरा-
116. E, H : द्विगुणकान्तिगुणगमेनिहिक्तिकेता
117. E, H : उपवशेष-
118. E, H : सहायभाक्
119. E, H : श्रेष्ठमध्यार्धकं
120. H : मध्येर्थांशके
121. E : लिङ्गान्धर्मन्तु०; H : लिङ्गान्धार्मन्तु०
122. E : जमादितथो; H : नमादतयो
123. E : कर्तुतद् ; H : कर्तुवद
124. E, H : तरे तरतुण्डका
125. E, H : सम्मता०
126. E, H : ०मध्यमम्
127. E, H : तरे

मुनिकराग्रजमादितयोदयं[128]
[129]नयनमात्रविवर्धनया ततम्[130] ।
नवविधं [131]तरुणप्रतिमोदयं
[132]सकलकेऽसकलं [च] यथा कुरु ॥ ५४ ॥
अपि च मूल[133]चलार्धकमुत्तमं
[134]तदनु धर्ममथांशमथान्तरे ।
नवविधं [135]युगकद्वयभागिके
तरुणबिम्बमुदीरितमार्चके[136] ॥ ५५ ॥
अचलतुल्यविशालसमोदयं[137]
[138]वरमधोङ्घ्रिविहीनकमाधमम् ।
वसुविभागयुते तु तदन्तरे
नवविधं विपुलोदयमासने ॥ ५६ ॥
उपललोहकुजे[139] तरुणालये-
[140][-ष्वभिहितास्तरवोऽपि च बालके ।
सरलकालजचन्दनसालका
खदिरमारुदपिप्पलतिन्दुकाः] ॥ ५७ ॥
यावत्संप्रार्थितार्थं तदुदयसमये मूलहर्म्यं प्रकल्प्य
तस्मिन्नुक्त्वा विधेयं सकलमपि वरं स्थापयेद् बालधाम्नि ।
द्विषट्संवत्सरान्तं तरुणभवनकं तद्वरं नेष्टमाद्यै-[141]
रन्येषां कर्मणां [142]स्यात्तदवधिरधिकं सर्वदोषप्रदं तत् ॥ ५८ ॥

128. H : वदोयं; E : वेदोयं
129. E : नवनवार्त्र; H : नवनवात्र
130. E, H : ०न वा
131. E, H : तरुणा-
132. H : सकल्के असकलां यथा कुरु
133. E, H : चलार्थ
134. E, H : तदच
135. E, H : युगले
136. E, H : ०मार्थके
137. E, H : मोहितं
138. H : वरद०
139. E, H : रुजे
140. E : ष्वभिहितं कचवोऽपि च यल्के । सकलाकल-चन्दनाल्काखदिरमारुजभिनोदितं कुरु; H : ष्वभिहितं कचवोऽपि च यालिके । सकलाकलचन्दनाल्का खदिराम-रुजयनिोदितङ्कुरु.
141. E, H : वरकेष्टमाद्यैः
142. E, H : स्युस्त०

प्रासादानां लिङ्गपीठार्चकानां[143]
दोषाढ्यानां [144]ग्रामवस्त्वादिकानाम् ।
एवं प्रोक्तं चानुकर्मण्यवश्यं
प्रोक्तादन्यत्सर्वदोषप्रदं तत्[145] ॥ ५९ ॥

इति मयमते वस्तुशास्त्रे अनुकर्मविधानं नाम
पञ्चत्रिंशोऽध्यायः

143. E, H : पीदोच्चकानं
144. E : ग्राववस्त्वा०; H : ग्रामवस्वा०
145. H : प्रदन्तम्